पद्मानायकपादपद्मयुगलीमास्वाद्य तज्जङ्घयोः
स्थित्वोरुद्वयमाप्य तत्कटितटीमाश्रित्य तन्नाभिजम् ।
पद्मं प्राप्य रमापरिग्रहमुरः प्राप्यायुधालंकृतान्
हस्तानाप्य मुखाब्जतन्मकुटयोर्मन्मानसं स्याद्ध्रुवम् ॥ ११० ॥

श्रीमत्कौशिकवंशवारिनिलयादाचार्यरत्नाकरात्
कृष्णार्यः समभूत् कलापरिवृतः शीतांशुना निर्मितः ।
सूनुर्वेङ्कटकृष्णनामसहितस्तस्याकरोद्वैष्णवं
श्रीपादादिशिखावधिस्तवमिमं मुख्यं समृद्धार्थकम् ॥ १११ ॥

॥ इति श्रीवरदराजशतकं सम्पूर्णम् ॥

---

४४. ॥ अथ श्रीलिङ्गभङ्गमुक्तिशतकम् ॥

यः पूज्यः सकलामरैर्मुनिगणा ध्यायन्ति यं येन वै
श्रेयोमार्गनियोजिताः सुयतयः कुर्वन्ति यस्मै नमः ।
यस्मात् सर्वमभूत् प्रमातृपटलं यस्यांशकत्रैपदे
यस्मिन्नाशमुपैति मायिकपदं तं रामचन्द्रं भजे ॥ १ ॥

श्रीमत्त्रैपदरामचन्द्रपरमानन्दाम्बुधिं चिद्घनं
नत्वा श्रीगुरुवासुदेवयतिराट्पादाम्बुजे चासकृत् ।
मच्चित्तासुनिरूपनाशविभवां मुक्तिं प्रवाञ्छन्हरे-
स्तुष्ट्यै लिङ्गविभङ्गमुक्तिशतकं कुर्वे हृदि स्याद्धरिः ॥ २ ॥

सत्कर्माणि विशुद्धये स्वमनसः कृत्वाथ शुद्धेऽन्तरे
छित्वा कर्मजबन्धनं दृढतरं वैराग्यतीक्ष्णासिना ।
सन्न्यस्य श्रवणादिना स्वमनसो नाशाद्यमापुर्हरिं
दद्यात् कारककर्मभङ्गविभवां मुक्तिं स रामोऽद्य मे ॥ ३ ॥

वाक्छोत्रादिदशेन्द्रियासुमनसो वागादिरूपं भजं-
स्तत्तद्व्यापृतिशक्ततां प्रजनयन्निःसङ्गरूपेण यः ।
आस्तेऽद्यापि समस्तभूतहृदये वेद्यादवेद्यात् परो
दद्यात् सर्वविभासकत्वविभवां मुक्तिं स रामोऽद्य मे ॥ ४ ॥

देशाद्भूमिरुपैति भूमपदवीं भूमेर्जलं तज्जला-
द्वह्निर्वह्नितनोः सदागतिरसौ तस्माद्बृहद्व्योम खात् ।
बीजं बीजतनोर्निरङ्कुशविभुर्निर्बीजभूमैव यो
दद्यात् केवलभूमरूपविभवां मुक्तिं स रामोऽद्य मे ॥ ५ ॥

अर्थादर्थमुपैति सूक्ष्मपदवीमर्थात्मनो मानसात्
बुद्धिर्बुद्धितनोर्महत्तत इहाव्यक्तं ततः पूरुषः ।
सूक्ष्मात् सूक्ष्मतरः पुमान्परमको यस्मान्न सूक्ष्मान्तरं
दद्यात् पूरुषशिष्टतत्त्वविभवां मुक्तिं स रामोऽद्य मे ॥ ६ ॥

सूर्यो यत्र न भाति शीतकिरणो वह्निर्न भानां गणः
सत्त्वादित्रिगुणं दशेन्द्रियमनःप्राणाः सुराणां गणः ।
यं भान्तं ह्यनुभान्ति न स्वत इमे सूर्याग्निचन्द्रादयो
दद्यात् सूर्यशशाङ्कभासकपदां मुक्तिं स रामोऽद्य मे ॥ ७ ॥

पूरन्नादिसमस्तकोशकलितास्त्येकादशद्वारपै-
र्वागाद्यैश्च[श्च सु]रक्षितातिभयतः स्वस्वामिभागेच्छया ।
तत्रासङ्गतया वसन्ननुदिनं यः प्रत्यगात्मा भवे-
द्दद्यात् केवलबोधरूपविभवां मुक्तिं स रामोऽद्य मे ॥ ८ ॥

यज्ज्ञानक्षुरधारया हृदयचिद्ग्रन्थिर्दृढा भिद्यते
यत्साक्षात्करणेन संशयगणः कुत्रेति न ज्ञायते ।
यज्ज्ञानाग्निरनन्तजन्मफलदं कर्मेन्धनं निर्दहे-
द्दद्यात् कर्तृचिदैक्यमोहविकलां मुक्तिं स रामोऽद्य मे ॥ ९ ॥

एकीकृत्य विराट्तनाविह पुनर्विश्वं स्वसूत्रेण तं
सूत्रे स्वप्न[श्च]पतिं च बीजतनुना प्राज्ञं पुनर्बीजकम् ।
निर्बीजात्मतया विचिन्त्य यतयो यं तुर्यरूपं विदु-
र्दद्यात्तुर्यशिवाद्वयात्मविभवां मुक्तिं स रामोऽद्य मे ॥ १० ॥

अन्नं प्राणतयावशिष्य मुनयः प्राणं मनोमात्रतो
विज्ञानात्मतयावशिष्य च मनो ज्ञानं च मोदात्मना ।
तं चाप्यात्मतयावशिष्य सहसा यं ब्रह्म पुच्छं विदु-
र्दद्यात् कोशविरूपनाशविभवां मुक्तिं स रामोऽद्य मे ॥ ११ ॥

सत्यं वैकृतिशून्यमेकममलं ज्ञानं जगद्भासकं
कालाकाशविदेशतोऽप्यतिविभु ब्रह्म ह्यनन्तं विदुः ।
सत्यं ज्ञानमनन्तमस्म्ययमिति ध्यात्वा यमीशं विदुः
दद्यात् सत्यसुबोधसौख्यविभवां मुक्तिं स रामोऽद्य मे ॥ १२ ॥

सूर्यो भाति सदागतिश्च पवते वह्निर्ज्वलत्यञ्जसा
मृत्युर्वज्रधरोऽपि शीतकिरणो राज्ञो भिया भृत्यवत् ।
उद्यद्दण्डधरस्य यस्य भयतः सूर्यादयो वेपिता
दद्यात् सर्वनियामकाद्वयपदां मुक्तिं स रामोऽद्य मे ॥ १३ ॥

निःसामान्यविशेषबोधनयने स्वस्मिन्नखण्डाद्वये
  दुःसामान्यविशेषदृष्टियुगलं दुर्बुद्धिभीकल्पितम् ।
प्रत्याख्याय विमूढकल्पितदृशं सन्न्यासिनो यं विदु-
  र्दद्यादद्वयदृष्टिसाध्यविभवां मुक्तिं स रामोऽद्य मे ॥ १४ ॥

रूपं पश्यति येन वक्ति वचनं जिघ्रेत् सुगन्धादिकं
  गृह्णात्याशु ददाति वस्तुनिचयं जानात्यशेषं सदा ।
यं प्रज्ञानमुदाहरन्ति मुनयो ब्रह्मादिकीटान्तगं
  दद्याज्ज्ञानघनस्वरूपविभवां मुक्तिं स रामोऽद्य मे ॥ १५ ॥

विश्वं येन समुत्थितं चिरतरं यत्सत्तया भाति सत्
  सम्यग्बोधदृशा विकारविलये यन्मात्रतः शिष्यते ।
तस्माद्वस्तुविकारजातमनघा ब्रह्मेति जानन्ति यं
  दद्यात् सर्वविकारभङ्गविभवां मुक्तिं स रामोऽद्य मे ॥ १६ ॥

विश्वं ब्रह्मणि जातु जन्म न भजे संभूत्यभावश्रुते-
  र्नोत्पादस्य विनाशनं न घटते नाशप्रहाणश्रुतेः ।
कार्याकार्यजनिप्रहाणरहितं यं निर्विकारं विदु-
  र्दद्यात् कारणकार्यकर्त्रविकलां मुक्तिं स रामोऽद्य मे ॥ १७ ॥

प्रागाग्नेयविदिक्षु दिक्षु निखिलस्यान्तर्बहिः सर्वतः
  तिष्ठन्नूर्ध्व उदेति नैत्युदयतां नास्तंगतः कुत्रचित् ।
यः कोट्यर्कसमूहभासकरुचिश्चित्सूर्यरूपो हरि-
  र्दद्यान्नित्यचिदर्करूपविभवां मुक्तिं स रामोऽद्य मे ॥ १८ ॥

सर्वज्ञादिगुणान्वितः परशिवः किञ्चिज्ज्ञ एवापरो
  ज्ञाज्ञत्वे प्रविहाय जीवपरयोर्लक्ष्यैकतां वेदतः ।
ज्ञात्वा तत्त्वमसीति याति यतिराड्ब्रह्माहमस्मीति यं
  दद्याज्जीवपरैक्यसौख्यविभवां मुक्तिं स रामोऽद्य मे ॥ १९ ॥

नान्यत् पश्यति यत्र जातु यतिराण्णान्यच्छृणोत्यञ्जसा
  नो जानाति विशेषवस्तुपटलं भूमाद्वयत्वश्रुतेः ।
ज्ञात्वा नामहृदालयोपरिलसद्भूमात्मकं यं विदु-
  र्दद्याद्भूमघनाद्वितीयविभवां मुक्तिं स रामोऽद्य मे ॥ २० ॥

दह्रे ब्रह्मपुराभिधानगगने लब्धासनो लोचनं
  कार्णं प्राप्य च हृच्च जीवकलनां जाग्रन्मुखां भासयन् ।
मूर्धानं प्रतिपद्य यो विजयते तुर्यस्वरूपो हरि-
  र्दद्यात्तुर्यपरात्मसौख्यविभवां मुक्तिं स रामोऽद्य मे ॥ २१ ॥

प्रत्यक्तत्त्वमहंपदेन गदितं ब्रह्मेति शब्दात् परं
भेदो मायिक एव जीवपरयोर्मायामृषात्वश्रुतेः ।
प्रत्यग्ब्रह्म भवाम्यहं परशिवोऽस्मीतीह यं प्राप्नुयु-
र्दद्यात् प्रत्यगभिन्नभूरिविभवां मुक्तिं स रामोऽद्य मे ॥ २२ ॥

मूर्तामूर्तविभातदृश्यपटले मायामनःकल्पिते
नेतीति श्रुतियुक्तितः प्रविलयं यातेऽथ यः शिष्यते ।
मूर्तामूर्तविभागमोहरहितः सत्यस्य सत्योऽद्वयो
दद्यान्निर्भयसत्यबोधविभवां मुक्तिं स रामोऽद्य मे ॥ २३ ॥

वैराग्यात् प्रतिपद्य बालपदवीं सर्वत्र निःसङ्गतो
मौनामौनविवेचनार्हधिषणापाण्डित्यपारंगताः ।
जीवन्मुक्तिमवाप्य तां पुनरमी विस्मृत्य यं प्राप्नुयु-
र्दद्यान्मौनविमुक्त[शुद्ध]पदवीं मुक्तिं स रामोऽद्य मे ॥ २४ ॥

क्षेत्रापत्यकलत्रवित्तविभवं त्यक्त्वा दवीयो भृशं
श्रोतव्यादिगुणान्वितोऽयमजडानन्दावबोधाम्बुधिः ।
ध्यातव्योऽनिशमप्रमादधिषणैर्यो निष्कलात्मा हरि-
र्दद्यान्निष्कलविष्णुरूपविभवां मुक्तिं स रामोऽद्य मे ॥ २५ ॥

यस्यानन्दलवैकदेशविभवा व्याविद्धपापालयाः
निष्कामाञ्चितबुद्धयः श्रुतिशिरोऽभिज्ञा महाश्रोत्रियाः ।
सम्म्राजो यतयो भवन्ति मुनयो ब्रह्मादयो नन्दिनो
दद्याद्भूरिसुखस्वरूपविभवां मुक्तिं स रामोऽद्य मे ॥ २६ ॥

ओतप्रोततया चरस्थिरजगद्बृन्देऽनिशं व्याप्य तत्
सत्तासूक्तिसुखैकरूपतनुता मिथ्याभिधां वारयन् ।
ज्ञानां ब्रह्मतया विभाति य इहाज्ञानां जगद्भावतो
दद्याद्विश्वविमोहभङ्गविभवां मुक्तिं स रामोऽद्य मे ॥ २७ ॥

यः साक्षादपरोक्षतः श्रुतिगि[शि]रोवाक्यार्थसंलग्नधी-
र्विद्वद्बृन्दहृदब्जसुन्दरगृहालंकारदीपायते ।
यश्चैत्यालिगचित्तवृत्तितमसो मध्याह्नसूर्यायते
दद्यात् केवलबोधदीपविभवां मुक्तिं स रामोऽद्य मे ॥ २८ ॥

सिद्धाभ्यासनयुङ्निरुद्धपवनात् प्राणद्वयाग्न्यैक्यत-
स्तप्त्वा कुण्डलिनीं तया विधिधराग्रन्थित्रयं भेदयन् ।
षट्चक्राणि च चन्द्रसूर्यमिथुनाद्यं ब्रह्मरन्ध्रे विशे-
द्द्याद्योगजमुख्यसिद्धिविभवां मुक्तिं स रामोऽद्य मे ॥ २९ ॥

भ्रूमध्यादिषु दृष्टियुग्मविलयात् प्राणानिले निश्चले
संकल्पाद्यतिवृत्तिजुष्टमनसि स्थैर्यं गतेऽस्यासतः ।
संशान्तानिलचित्तदृष्टिविभवं पश्यन्ति यं तारका
दद्यात्तारकपूर्णसिद्धिविभवां मुक्तिं स रामोऽद्य मे ॥ ३० ॥

मेर्वभ्रादिवदप्रकम्प्यधिषणः सन्ताडितो दुर्जनै-
स्त्रासं नैति नमस्कृतोऽपि विबुधैर्हर्षं परालोकनात् ।
यस्मिन् भूम्नि निरस्तमोहपटले विद्वान् समाप्तो भवे-
द्द्याद्ब्रह्मविमग्नचित्तपदवीं मुक्तिं स रामोऽद्य मे ॥ ३१ ॥

देहादावभिमान[न]तूलपटले बोधाग्निभस्मीकृते
चित्ते चैत्यगतिं विहाय चपलां चित्तत्त्वभावं गते ।
वक्तुं ध्यानमशक्यनिष्कलपदं यं योगिनः प्राप्नुयु-
र्दद्याद्वक्तुमशक्यसौख्यपदवीं मुक्तिं स रामोऽद्य मे ॥ ३२ ॥

सन्न्यस्य स्वगुरुं प्रणम्य विधिवत्तारं महावाक्यकं
लब्ध्वा शान्तिमुपेत्य दिक्षु सुलभां भिक्षामटन्तोऽमलाः ।
अन्तर्बाह्यविभागशून्यमतयः सन्न्यासिनो यं विदु-
र्दद्यान्मस्करिवर्यलब्धपदवीं मुक्तिं स रामोऽद्य मे ॥ ३३ ॥

जाग्रत्स्वप्नसुषुप्तिभेदकलनां त्यक्त्वा बुधैः सेवितां
तद्भावादि विभासयन्ननुदिनं प्रत्यक्स्वरूपेण यः ।
आस्ते तद्गतदोषसङ्गरहितस्तुर्योऽविकारास्पदो
दद्यात्तुर्यमहाप्रकाशविभवां मुक्तिं स रामोऽद्य मे ॥ ३४ ॥

श्रुत्याचार्यकटाक्षतः स्वहृदये बोधं तरां प्रापिते
प्रत्यग्वस्तुनि निश्चिते स्फुटमहं ब्रह्मास्मि सर्वातिगम् ।
ब्रह्मैवाहमिति स्थिरानुभवतो यद्रूपतां प्राप्नुयु-
र्दद्याच्छुद्धपरानुभूतिविभवां मुक्तिं स रामोऽद्य मे ॥ ३५ ॥

नानावासनया जडीकृतमतेः सत्त्वेन दुर्वासनां
दग्ध्वा सत्त्वसुवासनामपि पुनर्ब्रह्मप्रबोधाग्निना ।
संशान्ताखिलवासने स्वहृदये निर्वासनं यं विदु-
र्दद्याद्बोधमहाग्निदीप्तिविभवां मुक्तिं स रामोऽद्य मे ॥ ३६ ॥

मौनेनैव विजित्य वाग्भवरिपुं स्वल्पाशनात् कायजं
चित्तोत्थामितवृत्तिदुर्जयरिपुं ब्रह्मानुसन्धानतः ।
वैराग्येण विजित्य बोधदुरितं बोधेन यं प्राप्नुयु-
र्दद्याद्दुर्जयभङ्ग[रूप]विभवां मुक्तिं स रामोऽद्य मे ॥ ३७ ॥

देहादौ दृढभावनामहमिति त्यक्त्वा पराग्गामिनीं
प्रत्यग्भावनया प्रशान्तदुरितब्रह्मात्मगां भावनाम् ।
आलम्ब्याचलवीचिसौख्यजलधौ यस्मिन्निमग्ना बुधा
दद्यात् सौख्यपयोधिमुग्धविभवां मुक्तिं स रामोऽद्य मे ॥ ३८ ॥

सम्यक्ताडितकांस्यनादतुलिते तारे समुच्चारिते
वीणावेणुमृदङ्गमर्दलमहाभेरीध्वनिः श्रूयते ।
तन्मध्ये प्रणवध्वनौ स्वमनसो नाशाद्यमीशं विदु-
र्दद्यान्नादमनोविनाशविभवां मुक्तिं स रामोऽद्य मे ॥ ३९ ॥

पूर्वं रूपमपास्य रूपमपरं चित्ते गते स्वेच्छया
तद्रूपद्वयमध्यमेऽस्य मनसो वृत्तेरभावात्तदा ।
सूक्ष्मात् सूक्ष्मधियो विदुर्यमजडानन्दं न तन्निष्कलं
दद्यान्मानसवृत्तिशून्यविभवां मुक्तिं स रामोऽद्य मे ॥ ४० ॥

रागद्वेषजपापपुण्यपटले निर्मूलभावं गते
स्वाज्ञाने प्रलयं गते दृढतरब्रह्मात्मबोधात्तराम् ।
सत्यज्ञानसुखस्वरूपविभवो यः शिष्यते श्रीहरि-
र्दद्याच्छ्रीहरिबोधसौख्यविभवां मुक्तिं स रामोऽद्य मे ॥ ४१ ॥

ज्ञानं प्राप्य गुरोर्मुखादनुदिनं संकल्पमुन्मीलयन्
लाभालाभविषादहर्षरहितप्रारब्धवेगात्तनुः ।
तिष्ठेद्गच्छतु वेति दिक्षु विचरन् यस्मिन् समाप्तौ भवे-
द्दद्याच्छाश्वतबोधलब्धविभवां मुक्तिं स रामोऽद्य मे ॥ ४२ ॥

धीसंकल्पितवस्त्वसन्मतियुतैरक्षैर्गृहीतं तु सत्
सत्त्वासत्त्वविभेदवेदनदृशं ज्ञात्वा बहिश्चान्तरे ।
तां दृष्टिं प्रविलाप्य भूम्नि मुनयो यं प्राप्नुयुः सद्घनं
दद्यात् सद्घनदृष्टियोगविभवां मुक्तिं स रामोऽद्य मे ॥ ४३ ॥

स्वाद्यस्वादकमध्यदर्शनवशात् स्वाद्यादिभावातिगं
बुद्ध्वैव स्वदनं विकाररहितं वाग्बुद्ध्यगम्यं शिवम् ।
स्वाद्यस्वादकभेददृष्टिविकला यं प्राप्नुयुश्चिद्घनं
दद्याच्चिद्घनशुद्धसत्त्वविभवां मुक्तिं स रामोऽद्य मे ॥ ४४ ॥

तालोरूर्ध्वबिले निवेश्य रसनां धीवायुनोर्ध्वं नयन्
भ्रूमध्ये च सहस्रपत्रकमले सूर्येन्दुसंयोगतः ।
पीत्वैवामृतमेत्य तृप्तिमवशाद्यस्मिन्नचित्तो भवे-
द्दद्याल्लम्बिकयात्तबोधविभवां मुक्तिं स रामोऽद्य मे ॥ ४५ ॥

वेदान्तश्रवणादिपक्वधिषणाः स्वान्तर्बहिर्भावनां
निश्शेषं प्रविहाय जन्ममृतिदां निस्नेहदीपार्चिवत् ।
चित्तारूपलयं प्रपद्य यतयो यस्मिन् समाप्तिं गता
दद्यात् केवलचित्तभङ्गविभवां मुक्तिं स रामोऽद्य मे ॥ ४६ ॥

विज्ञानात्मतया हृदब्जकुहरे तिष्ठन् सदा देहिनां
भूयस्तदन्नचर्यादिसत्करणतो दुष्कृत्यतो नीचदाम् ।
सर्वेशत्वमवाप्य मायिकपदे यो वर्ततेऽद्याप्यजो
दद्यादीश्वरसाम्यबोधविभवां मुक्तिं स रामोऽद्य मे ॥ ४७ ॥

स्थूलेशस्तमसान्वितः पृथुतनुः सूत्रे रजस्संयुतो
बीजेशस्तु विशुद्धसत्त्वगुणयुक् सर्वोपसंहारतः ।
पूर्वोक्तत्रिगुणान्वितोऽप्यरिपुमान् यो निर्गुणः स्याद्धरि-
र्दद्यान्निर्गुणतुर्यविष्णुविभवां मुक्तिं स रामोऽद्य मे ॥ ४८ ॥

निर्मायोऽपि विशुद्धसात्त्विकतनुं स्वीकृत्य लीलामयीं
सच्छिष्यान् प्रतिबोधयन् श्रुतिशिरोविज्ञानमव्याजतः ।
श्रीमद्देशिकरूपमेत्य विचरेद्यो निष्कलात्मा हरि-
र्दद्याद्देशिकलब्धबोधविभवां मुक्तिं स रामोऽद्य मे ॥ ४९ ॥

यद्वद्व्योमघटादिवस्तुपटले तत्तत्परिच्छेदतां
प्राप्तं भात्यविवेकिनां स्थिरचरे तद्वत् पुमानेकलः ।
जीवोऽयं जगदीश्वरो जगदिदं ब्रह्मेति यो ज्ञानिनां
दद्यात् सर्वविकल्पभङ्गविभवां मुक्तिं स रामोऽद्य मे ॥ ५० ॥

साङ्गोपाङ्गतया विभातनिगमा न्यायादिशास्त्राणि षड्
वेदार्थानुचराः पुराणनिचया येनार्थवन्तोऽभवन् ।
ते किं ब्रह्म निदर्शयेयुरिति सद्बोधाद्यमीशं विदु-
र्दद्याद्वाक्यपदार्थदूरविभवां मुक्तिं स रामोऽद्य मे ॥ ५१ ॥

जायासूनुधनेषणाविरहिता वेदान्तपारंगता
स्वान्तर्बाह्यजचित्तचैत्यकलनाशून्या महाश्रोत्रियाः ।
यद्विष्णोः परमं पदं प्रविततं पश्यन्त्यमी सूरयो
दद्याद्विष्णुपदाभिधानविभवां मुक्तिं स रामोऽद्य मे ॥ ५२ ॥

सर्वज्ञं परमेश्वरं प्रणवगं प्रत्यक्परात्माभिधं
भेदाभेदविभागशून्यविभवं ज्ञात्वा गुरोर्वेदतः ।
भेदाभेदगतिं विहाय यतयो यं प्राप्नुयुः श्रीहरिं
दद्यात् सर्वभिदाभिदादिरहितां मुक्तिं स रामोऽद्य मे ॥ ५३ ॥

आकाशादिकपञ्चभूतकलनासञ्जातनानाविधा-
नेकप्राणिहृदब्जमध्यविलसत्सर्वेन्द्रियोद्दीपकः ।
चित्सामान्यकलेबरोऽखिलगुरुर्नारायणो यो भवे-
द्दद्यात् सर्वहृदब्जसूर्यविभवां मुक्तिं स रामोऽद्य मे ॥ ५४ ॥

चित्तास्वादिविकल्पनाशसमये सम्यक्प्रबुद्धात्मनो
देहे व्योम्नि च कालकूटपटले दग्धे प्रबोधाग्निना ।
देशाभ्रादिगमानशून्यविभवो यः शिष्यते श्रीहरि-
र्दद्यात् प्राणविकल्पनाशविभवां मुक्तिं स रामोऽद्य मे ॥ ५५ ॥

बीजं ब्रह्मणि कल्पितं भुजगवद्रज्जौ तदज्ञानतो
बीजाद्विश्वमनन्यबोधत इदं विश्वं भजेद्बीजताम् ।
बीजं प्रत्यगभिन्नतां यममलं निर्बीजसौख्यं विदु-
र्दद्यादावृतिबीजभर्जनभवां मुक्तिं स रामोऽद्य मे ॥ ५६ ॥

पूर्णब्रह्मविकल्पितत्वनिगमान्मायापदस्याधुना
मिथ्यात्वं स्फुटमेव रज्जुफणिवत् सत्यं तदाधारकम् ।
नष्टेऽबोधचये प्रबोधरविणा यत्पूर्णता शिष्यते
दद्यात् पूर्णचिदम्बुराशिविभवां मुक्तिं स रामोऽद्य मे ॥ ५७ ॥

नानारूपविशेषमोहरहितं निर्मायतत्त्वं ततं
सत्यं ज्ञानमपारसौख्यविभवं संशान्तनानाभिधम् ।
ब्रह्मास्मीति यदानुभूय समतां यं साम्यभावं विदु-
र्दद्यात् साम्यसुखानुभूतिविभवां मुक्तिं स रामोऽद्य मे ॥ ५८ ॥

सौराः श्रेष्ठमुदाहरन्ति तरणिं शाक्ता भवानीं भृशं
विष्णुं केचन वैष्णवा गणपतिं शैवाः शिवं भैरवम् ।
इत्थंभूतधियो यमद्वयतनुं जानन्ति नैवैकधा
दद्यात् सर्वमदान्धकारतरणिं मुक्तिं स रामोऽद्य मे ॥ ५९ ॥

पाणिं पाणितलेन पीड्य तरसा दन्तैः स्वदन्तान् रुषा
चूर्णीकृत्य निहत्य मानसरिपुं भ्रूमध्यलक्ष्यासिना ।
स्वाराज्यं प्रतिपद्य निर्भयतया यद्रूपमात्रो भवे-
द्दद्यात्तीव्रविरागबोधविभवां मुक्तिं स रामोऽद्य मे ॥ ६० ॥

हृन्मध्ये रविपत्रमस्ति कमलं तन्मध्यखेऽस्त्येकलो
धूमज्योतिसमानकान्तिकलितः पूर्जो [र्णो]बहिश्चान्तरा ।
चित्ते चैत्यततौ निरञ्जनतया यो भासयन् वर्तते
दद्यादेकलभूरिसौख्यविभवां मुक्तिं स रामोऽद्य मे ॥ ६१ ॥

आधारेऽस्त्यपुनर्भवाभिधसिरा तस्या मनोधारणात्
सा वक्त्रं विकसीकरोत्यथ सिरावक्त्रान्तरे मानसम् ।
दृक्प्राणाग्निभिरेत्य गच्छति लयं यस्मिन् हरौ योगिनो
दद्यान्मानसदृष्टिचित्तलयजां मुक्तिं स रामोऽद्य मे ॥ ६२ ॥

भित्त्वा कल्पसमाधिभाक् स्वमनसा भूमिं जलं वानलं
वायुं व्योम सुसूक्ष्मभूतपटलं चेतो महच्चाक्षरम् ।
अव्यक्तं च विभिद्य मृत्युमधुना यस्मिन् समाप्तो भवे-
द्दद्यात् सर्वजयामृताढ्यपदां मुक्तिं स रामोऽद्य मे ॥ ६३ ॥

श्रोत्रादौ प्रविलाप्य चैत्यपटलं श्रोत्रादि दिक्पूर्वके
दिग्वातादि सिरासु ताश्च तं ... ज्ञानमध्ये च तत् ? ।
मोदे तं च तुरीयके तदमृतं निर्बीजकं यं विदु-
र्दद्यादक्षविरूपनाशविभवां मुक्तिं स रामोऽद्य मे ॥ ६४ ॥

ब्रह्मादिस्थिरजङ्गमान्तकलनातृष्णां मनोजृम्भिताम्
आत्मानात्मविवेकजातसहजज्ञानाग्निना निर्दहन् ।
यस्मिन् प्रत्यगभिन्नपूर्वविभवे योगी भजेदेकतां
दद्याज्ज्ञानकृशानुदग्धकलनां मुक्तिं स रामोऽद्य मे ॥ ६५ ॥

शब्दादौ विलयं गते दृढतरज्ञानादहोरात्रयुक्-
काले कालपदं गते स्वमनसि ध्यानात् स्थिरत्वं गते ।
उन्मन्या विलसत्परावरगुरुं नारायणं यं विदु-
र्दद्यादुन्मनिभातचिद्घनपदां मुक्तिं स रामोऽद्य मे ॥ ६६ ॥

ध्यानादित्रिपुटिप्रहाणत इदं निर्वातदीपार्चिवत्
संशान्ताखिलवीचिवार्धिजलवत् संकल्पशून्यं मनः ।
भूयात्तत्र विराजते परशिवानन्दात्मको यो हरि-
र्दद्याच्छैवपरात्मरूपविभवां मुक्तिं स रामोऽद्य मे ॥ ६७ ॥

दृग्युग्माखिलचित्तवृत्त्यचलगा सन्तृप्तिरल्पाशनं
देहस्याचलनं परानुभवतोऽवस्थात्रयातीतता ।
यस्मिन्नस्तमनो मुनेरनुभवस्त्वेवं भवेत् सर्वदा
दद्यात् सिद्धिविभातकीर्तिविभवां मुक्तिं स रामोऽद्य मे ॥ ६८ ॥

विस्मृत्याखिलबाह्यमान्तरमपि स्वोद्भूतविज्ञानतो
ब्रह्माब्धौ जलबिन्दुवत् प्रविलयं नीत्वा मनोवैभवम् ।
वेदव्यासतनूद्भवः शुकमुनिर्यस्मिन् समाप्तो भवे-
द्दद्याच्छ्रीशुकलब्धसौख्यविभवां मुक्तिं स रामोऽद्य मे ॥ ६९ ॥

आत्मानात्मविवेचने श्रुतिगुरोर्वाक्यात्कृते सादरं
सत्यं ब्रह्मभिदा मृषेति विदिते ग्राह्याद्यभावान्मुनेः ।
यस्मिन्नग्रहरूपभूम्न्यविलयं गत्वा समाप्तं मनो
दद्यादग्रहभूरिलब्धविभवां मुक्तिं स रामोऽद्य मे ॥ ७० ॥

जाग्रत्स्वप्नसुषुप्तिमोहतमसि स्वान्तं मुनेर्लीयते
तुर्याकल्पसमाधिनिष्ठमनसः सत्त्वाल्लयं नैति तत् ।
तुर्यातीतपदे विरूपविलयाद्यस्मिन् समाप्तं भवे-
द्द्यात्तुर्यविलक्षणाद्वयपदां मुक्तिं स रामोऽद्य मे ॥ ७१ ॥

चेतश्चैत्यविकारपूगरहिता चिद्ब्रह्मलीना यदा
किञ्चिन्नैत्यनुभूतिसिद्धविभवो मुक्तावगम्यस्तदा ।
सत्तासाम्यमुपेत्य यो विजयते नारायणः केवलो
दद्यात् केवलभूमतत्त्वविभवां मुक्तिं स रामोऽद्य मे ॥ ७२ ॥

संकल्पादिविमुक्तयोगिमनसि प्राणाग्निदग्धचेतसा
मग्नेऽत्यन्तमजातिगोत्रकलने स्वे धाम्नि बोधार्णवे ।
सत्यानन्दविशुद्धबोधविभवो यः शिष्यते श्रीहरि-
र्दद्याज्जातिकुलाभिमानविभवां मुक्तिं स रामोऽद्य मे ॥ ७३ ॥

कर्तव्यार्थनिबन्धनं स्वमनसः कर्माख्ययोगामृत-
श्रेयःसाधनसाध्यबन्धनमिह ज्ञानाख्ययोगो वरः ।
संशान्ताखिलयोगसाध्यविभवं यं ज्ञानिनः प्राप्नुयु-
र्दद्यात् साधनसाध्यभावरहितां मुक्तिं स रामोऽद्य मे ॥ ७४ ॥

देहास्वोः क्षणभङ्गुरत्वनिगमाद्दारादिबाह्येऽन्तरे
चित्ते चैत्यततावसङ्गमनसा संत्यज्य दुर्वासनाम् ।
ब्रह्मास्मीति सुवासनापरवशो यं प्रैति नारायणं
दद्यादैक्यसुवासनाफलभवां मुक्तिं स रामोऽद्य मे ॥ ७५ ॥

भावाभावगतिं विहाय सदसद्भावं च धीकल्पितं
सर्वाभासविवर्जितं स्थिरचराधारं परस्ताद्धि यः ।
आलम्ब्याचलनिर्विकल्पमनसा यस्मिन् समाप्तो भवे-
द्दद्याद् बुद्धिविकल्पशून्यविभवां मुक्तिं स रामोऽद्य मे ॥ ७६ ॥

संशान्ताखिलहेयरन्ध्रविषयध्वान्तं सकृद्भानतः
संकल्पोज्झितचित्तभावितपदं सूर्यादिसूर्यात्मकम् ।
ब्रह्माहं प्रकृतेः परोऽहमिति यं स्वात्मानमेवं विदु-
र्दद्यात् प्राकृतवैकृतप्रलयजां मुक्तिं स रामोऽद्य मे ॥ ७७ ॥

कर्मज्ञानदशेन्द्रियाल्यविदितः प्राणादिपञ्चानिल-
ध्वान्तस्फारसहस्रचण्डकिरणोऽहङ्कारशत्रुंजयः ।
नानावृत्तिमनोधियः परतरानन्दात्मको यो हरि-
र्दद्याल्लिङ्गशरीरभङ्गविभवां मुक्तिं स रामोऽद्य मे ॥ ७८ ॥

सूक्ष्मात् सूक्ष्मतरोऽस्मि योगिविदितो ज्यायानहं ज्यायसां
संशान्ताखिलवेदनोऽस्मि जगतः सत्तास्वरूपोऽस्म्यहम् ।
एवं भावनया प्रशान्तदुरिता यं प्राप्नुयुः शाश्वतं
दद्याच्छाश्वतसौख्यसिद्धिविभवां मुक्तिं स रामोऽद्य मे ॥ ७९ ॥

मत्पुत्रो मम वित्तदारसुहृदो मत्क्षेत्रमित्यादिकं
द्वैतं देहदशेन्द्रियासुधिषणातादात्म्यमेवाद्वयम् ।
द्वैताद्वैतमनोगतेः प्रविलयाद्यः शिष्यते निर्भयो
दद्यान्निर्भयनिर्विकारपदवीं मुक्तिं स रामोऽद्य मे ॥ ८० ॥

त्यक्ताहङ्कृतिचित्तचैत्यकलनासंवित्स्वरूपोऽस्म्यहं
जीवेशादिभिदा विहीनपरमानन्दावबोधोऽस्म्यहम् ।
मत्तो नान्यदिहास्ति किंचिदिति यं नारायणं प्राप्नुयु-
र्दद्यादद्वयभावनात्तपदवीं मुक्तिं स रामोऽद्य मे ॥ ८१ ॥

सर्वासर्वमहाभ्रमप्रविलयात् सर्वादिशून्योऽस्म्यहं
साक्षित्वं न हि मेऽस्ति साक्ष्यविलयादद्वैतबोधोऽस्म्यहम् ।
स्वीये धामनि संस्थितोऽहमजरोऽस्म्येवं विदुर्यं हरिं
दद्यात् साक्ष्यविरूपनाशविभवां मुक्तिं स रामोऽद्य मे॥ ८२ ॥

नाहं देहमुखेन्द्रियालयमनो नाहं विकल्पान्वितो
नाहं मायिकविश्वभेदनिचयो नाहं तदाधारकः ।
ब्रह्मैवाहमितीह यं मुनिगणा ज्ञात्वा चिरात्प्राप्नुयु-
र्दद्यान्मायिकभावनालयभवां मुक्तिं स रामोऽद्य मे ॥ ८३ ॥

द्वैताद्वैतविभागभेदरहितो वाग्बुद्ध्यगम्योऽस्म्यहं
सत्यासत्यशुभाशुभालिरहितश्चिन्मात्ररूपोऽस्म्यहम् ।
सत्यापारसुखात्मकोऽस्म्यहमिति प्राप्ता यमीशं हरिं
दद्यान्मानसवागगम्यपदवीं मुक्तिं स रामोऽद्य मे ॥ ८४ ॥

मायाकल्पितभौतिकालिहृदयारूढामहंभावनां
पूर्णाहंकृतिरेकदा कबलयन् सर्वेश्वरः सर्वगः ।
आस्ते तद्गतभेदपूगरहितो यो नित्यशुद्धोऽद्वयो
दद्यादीश्वरपूर्णबोधविभवां मुक्तिं स रामोऽद्य मे ॥ ८५ ॥

अन्तर्बाह्यज चित्रनैत्यकलनासङ्गानुसन्धानतो
जीवन्मुक्तिमवाप्य वीतकलनान्नष्टेऽथ कर्मत्रये ।
देहाक्षासुदिरूपनाशविभवो यः शिष्यतेऽस्मद्गुरु-
र्दद्यात् स्थूलकलेबरादिरहितां मुक्तिं स रामोऽद्य मे ॥ ८६ ॥

मायाकल्पितदेशकालकलनासंजातनानाविधा-
नेकोपाधिदृढानुभूतिममताहन्तातमोभास्करः ।
यो निष्काममुनीन्द्रहृन्मणिगृहालंकारपादाम्बुजो
दद्यात् कामगणक्षयाप्तविभवां मुक्तिं स रामोऽद्य मे ॥ ८७ ॥

सर्वोपाधिविहीनपुष्करतनुः संशान्तरूपाभिधो
नानाकामनया विमुक्तमुनिहृत्पद्मावलीषट्पदः ।
यो वाङ्मानसदृश्यगोचरमहानन्दावबोधाम्बुधि-
र्दद्यात् सर्वहृदभ्रचिन्मणिभवां मुक्तिं स रामोऽद्य मे ॥ ८८ ॥

दासोऽहं तव मृत्युपाशकलितं मां रक्ष भक्तार्तिहन्
एवं प्रार्थ्य विशुद्धिमेत्य मनसोऽहं त्वं त्वमेवास्म्यहम् ।
भेदो नौ न हि मायिकोऽयमिति यं नारायणं प्राप्नुयु-
र्दद्याद्भागवताधिगम्यपदवीं मुक्तिं स रामोऽद्य मे ॥ ८९ ॥

मायाधीभवभेदकूल[बोध]पटले निर्मायबोधाग्निना
दग्धे काममकामखड्गदलिते कामे स्वभृत्यैः समम् ।
संशान्ताखिलभेदकामकलनं यं स्वात्मरूपं विदुः
दद्यात् कामभिदाविनाशविभवां मुक्तिं स रामोऽद्य मे ॥ ९० ॥

मायापादजपुष्करादिकमहाभूतालियोगोद्भवा-
नेकब्रह्मकटाहकोटिपटलं त्रैगुण्यसंकल्पितः ।
निस्त्रैगुण्यमहात्रिपादविभवो यः कल्पितः केनचि-
द्दद्यान्मायिकपादमोहविकलां मुक्तिं स रामोऽद्य मे ॥ ९१ ॥

यास्याम्यद्य विदेहमुक्तिपदवीं मुञ्चेह मां चित्त भो
यद्वा चिद्गगने विरूपविलयं गच्छ त्वदीयैः समम् ।
एवं चित्तशिशुं प्रबोध्य यतिराड्यस्मिन् समाप्तो भवे-
द्दद्यात् केवलवीतचित्तपदवीं मुक्तिं स रामोऽद्य मे ॥ ९२ ॥

राग त्वं भज वीतरागपदवीं द्वेष त्वमद्वेषतां
भीते त्वं भज निर्भयत्वमधुना द्वैत त्वमद्वैतताम् ।
रागादिं विनियम्य निष्कलपदे यस्मिन् समाप्तो भवे-
द्दद्यान्निष्कलनिर्भयाद्वयपदां मुक्तिं स रामोऽद्य मे ॥ ९३ ॥

काम त्वं भज वीतकामपदवीं तृष्णे वितृष्णासुखं
भो भो मानस निर्विकल्पमधुनाहंकारशान्तिं तराम् ।
सान्त्वोक्त्यैव सुहृज्जनं परिहरन् यस्मिन् भजन्त्येकतां
दद्यात्काममुखारिभङ्गविभवां मुक्तिं स रामोऽद्य मे ।। ९४ ।।

विश्वाकारमतिं विहाय सहजानन्दावबोधां मतिं
स्वीकृत्येव महानुभावचरणाः श्रीवीतहव्यादयः ।
सत्यज्ञानसुखार्णवेऽतिविपुले यस्मिन् भजन्त्येकतां
दद्यान्मौनिगणात्तसौख्यविभवां मुक्तिं स रामोऽद्य मे ।। ९५ ।।

ब्रह्मास्मीत्यनुभूतियोगदहने निर्वृत्तितैलैधिते
हुत्वा मायिकचित्तचैत्यकलनां होमानलोत्थां सतीम् ।
मुक्त्याख्यां परिरभ्य मस्करिवरो यत्सौख्यतल्पं गतो
दद्याद्दृश्यविरूपनाशविभवां मुक्तिं स रामोऽद्य मे ।। ९६ ।।

संशान्ताखिलपञ्चभूतकलनासञ्जातनानाजनि-
श्चातुर्विध्यनिरोधशून्यविभवो जन्माद्यभावश्रुतेः ।
दीर्घह्रस्वबृहत्कृशादिरहितो यः सर्वदा भासते
दद्याज्जन्मनिरोधशून्यविभवां मुक्तिं स रामोऽद्य मे ।। ९७ ।।

सत्यज्ञानसुखाज्ञतासमुदितासत्यादिमायात्रय-
प्रत्याख्यानमहावचोऽर्थविभवः प्राप्तः पुनः प्राप्यते ।
मुक्तो मुच्यत एव नेतर इति ज्ञानाद्यदैक्यं व्रजे-
द्याज्ज्ञानसुनिश्चितार्थविभवां मुक्तिं स रामोऽद्य ।। ९८ ।।

स्वाज्ञाने सकलङ्कचित्तविभवे स्वज्ञानवैश्वानरा-
द्दग्धे सम्यगनावृतः परशिवः स्वाराज्यसिंहासने ।
एको यः परिशिष्यते परपुमान्नारायणोऽयं स्वयं
दद्याद्द्वैतविरूपनाशविभवां मुक्तिं स रामोऽद्य मे ।। ९९ ।।

भूमब्रह्मणि मूढबुद्ध्यनुभवारूढं समस्तं जग-
न्नेतीति श्रुतिसिद्धयुक्तिपटलैर्नास्तीति निश्चित्य तत् ।
त्यक्त्वा विश्वविनोदनं मुनिगणा यस्मिन् समाप्तिं गता
दद्याद्विश्वविनोदभङ्गविभवां मुक्तिं स रामोऽद्य मे ।। १०० ।।

व्याविद्धाखिलवाक्यपादविभवो वाग्बुद्ध्यगम्योऽद्वयो
निःसाध्योऽयमसाधनो न हि भवो नान्तं गतः कुत्रचित् ।
लक्ष्यालक्ष्यविभागमोहरहितो यः शिष्यते श्रीहरि-
र्दद्याल्लक्ष्यविलक्षणाद्वयपदां मुक्तिं स रामोऽद्य मे ।। १०१ ।।

आविद्यार्थपदे विरूपविलयं याते स्वकार्यैः समं
संशान्ताखिलनामरूपविभवः प्रत्यक्परात्मैक्यकः।
चातुर्विध्यपदाभिधानरहितो यस्तैपदः शिष्यते
दद्यात् पादचतुष्टयैक्यविभवां मुक्तिं स रामोऽद्य मे ॥ १०२ ॥

श्रद्धाभक्तिपुरःसरं रहसि यो विष्णवालये वा पठे-
न्नानालिङ्गविभङ्गमुक्तिशतकं तात्पर्यतः सादरम्।
तस्य त्रैपदरामचन्द्रतरणिः स्वाज्ञानमुन्मूलयन्
दास्यत्येव विदेहमुक्तिपदवीं शिष्टत्रिपाद्रूपिणीम् ॥ १०३ ॥

श्रीमत्पारमहंस्यधर्मनिरतश्रीवासुदेवेन्द्रचि-
त्पादांभोजनिवासिषट्पदनिभश्रीरामचन्द्रेन्द्रतः।
वक्तुं व्यातुमशक्यमायिकपदालंकारसंघाततो
लिङ्गाकारविभङ्गमुक्तिशतकं ज्ञातं कटाक्षाद्धरेः ॥ १०४ ॥

॥ इति श्रीलिङ्गभङ्गमुक्तिशतकं सम्पूर्णम् ॥